देववाणीमन्दिरमुखपत्रम्
प्रारंभ: १९७९

# गीर्वाणसुधा

यथा पयोधेर्लहरीप्रसूता सुधा सुराणाममृतत्वहेतुः ।
तथैव गीर्वाणसुधापि भूयात् नवीनसारस्वतवीचिभूतेः ॥

खण्डः ३८ आषाढ–भाद्रपद शके १९३९ अङ्काः ४–६

जुलै–सप्टेंबर २०१७

संस्थापक : श्री. भि. वेलणकर

प्रधानसंपादक : प्रा. डॉ. सौ. कमल अभ्यंकर

संपादनसाहाय्यम् : सौ. वीणा गोडबोले



विमानसेवाद्वारा परदेशे प्रेष्यते ।

देववाणीमन्दिरम्
भीमाबाई राणे शाळा, तळमजला, राजा राममोहन रॉय मार्ग, गिरगाव, मुंबई–४
devavaneemandiram@gmail.com

संस्थायै प्रदत्तं दानं S. 80-G आयकर–विधानद्वारा करमुक्तिं लभते ।

(Exemption of Tax as per S. 80-G, I.T. Act 1961 is available to our donors.)

वर्षम् : ३८ अङ्काः – ४–६

# गीर्वाणसुधा ।

संस्थापकः
पंडित श्रीराम वेलणकर
देववाणीमन्दिरम् – भीमाबाई राणे शाळा, तळमजला, राजा राममोहन रॉय मार्ग,
गिरगाव, मुंबई – ४०० ००४. (भारत)
आषाढ–भाद्रपद शके १९३९ जुलै–सप्टेंबर २०१७

## संपादकीयम्

सुहृदः,

प्रसन्नश्रावणेन सह उत्साहपूर्णः भाद्रपदमासोऽपि भुवौ अवतीर्णः। श्रीगजानन–आगमनस्य प्रतीक्षायाम् उत्कण्ठितं जगत्। नियतसमये प्रकाश्यमानया अनया 'गीर्वाणसुधा' पत्रिकया रसिकानन्दः अवश्यं वृद्धिंगतो भविष्यति।

संस्कृतविदुषां तथा संस्कृतकार्यकतॄणां संक्षिप्त–परिचयदानस्य अस्माकं संकल्पः अस्मिन् अङ्केऽपि यावदुपलब्धपरिचयदानेन पुरस्सरति एव।

अन्यसंस्कृतविद्वद्भ्यः तथा संस्कृतकार्यकर्तृभ्यः स्वपरिचयप्रेषणार्थं सविनयम् आवाहनं क्रियते अस्माभिः।

अस्मिन् अङ्के एतैः परिचयैः सह कुराणस्य संस्कृतानुवादः (क्रमशः), कार्व्हरः (क्रमशः), देववाणीमन्दिरस्य विविधोपक्रमाः, संस्कृतजगति वर्तमानाः घटनाः इत्यादिकं अन्तर्भूतमेव।

अत्रस्थौ डॉ. गौरी माहुलीकरमहोदयायाः श्रीलङ्काविषयकलेखमालायाः प्रथमः भागः तथा डॉ. नीलेश जोशीमहोदयस्य 'पुष्कर–तीर्थ' विषयकः लेखः अवश्यं जिज्ञासावर्धकौ।

विघ्नहर्ता विनायकः सार्थनामा भवतु तथा अस्माकं भारतभूः सुखशान्तिसमृद्धा भवतु इत्येव प्रार्थना।

# तीर्थराजः पुष्करः

डॉ. नीलेश जोशी

पुष्करः ब्रह्मदेवस्य मन्दिरं तथा च उष्ट्राणां व्यापारः तदर्थं प्रसिद्धः। पुष्करस्य शाब्दिकार्थः सरः तटाकः वा। अजमेरनगरात् मात्रं ११ किलोमीटर इति यावद्दूरं तीर्थराजः पुष्करः विश्वविख्यातः तथा च पुराणेषु वर्णिततीर्थेष्वस्य महत्त्वपूर्णं स्थानम्। राजस्थानराज्यस्य अजमेरनगरे नैकानि पर्यटनस्थलानि सन्ति। तेष्वेकोऽयम्। अनेकपौराणिककथाः प्रमाणार्थं समुपलभ्यन्ते।

## पौराणिकः उल्लेखः

पौराणिकदृष्ट्या पुष्करस्य निर्माणकथाः रहस्यमयाः रोमाञ्चपूर्णाः। अस्योल्लेखः पद्मपुराणे समुपलभ्यते। पद्मपुराणस्य सृष्टिखण्डे कथ्यते कस्मिंश्चित् काले वज्रनाभः नामकः एकः राक्षसः स्थानेऽस्मिन्नुषित्वा ब्रह्मदेवस्य पुत्रान् हतवान्। क्रोधितेन ब्रह्मदेवेन करस्थकमलप्रहारेण राक्षसः हतः। तदा कमलस्य यानि दलानि भूमौऽपतन्, तस्मात् स्थानाज्जलधाराः प्रवाहिताः। कालान्तरेण तान्येव त्रीणि स्थलानि क्रमाज्ज्येष्ठपुष्करः च मध्यमपुष्करः च कनिष्ठपुष्करश्च नामभिः विख्यातानि। ज्येष्ठपुष्करस्य देवता ब्रह्मा मध्यस्य विष्णुश्च कनिष्ठस्य देवता शिवश्च। मुख्यपुष्करः ज्येष्ठपुष्करः तथा च कनिष्ठपुष्करः वृद्धपुष्करः नाम्ना अभिहितोऽपि च बुद्धपुष्करः।

राक्षसवधस्य पश्चात् ब्रह्मदेवेन स्थानस्य पवित्रीकरणस्योद्देशेन उदिते कार्तिकनक्षत्रे कार्तिक-एकादश्यां तिथौ अत्र यज्ञः अनुष्ठितः, यस्मिन् सर्वाः देव-देवताः आमन्त्रिताः। अस्य पूर्णाहुतिः पूर्णिमायां समपद्यत। ततोऽत्र कार्तिकमासस्य एकादशीतः पूर्णिमापर्यन्तं महोत्सवः प्रचलति।

पद्मपुराणानुसारेण यज्ञं निर्विघ्नं नेतुं ब्रह्मदेवेन दक्षिणदिशि रत्नागिरिः उत्तरस्यां नीलगिरिः पश्चिमदिशि सुवर्णचूडस्तथा च प्राच्यां सर्पगिरिः नामकाः पर्वताः निर्मिताः। परमाराध्यायाः देव्याः गायत्र्याः जन्मस्थानमपि पुष्कर एव मन्यते।

## रामायणे उल्लेखः

वाल्मीकिरामायणेऽपि पुष्करस्योल्लेखः वर्तते। अयोध्यायाः राजानं त्रिशङ्कुं सदेहं स्वर्गं प्रेषयितुं विश्वामित्रेणात्र तपस्तप्तम्। अप्सरा मेनकापि पुष्करस्य पवित्रजले स्नातुमगात्। ततस्तामत्र दृष्ट्वैव विश्वामित्रः कामवशीभूतः। भगवता रामेणापि पितुः दशरथस्य श्राद्धं मध्यपुष्करस्य समीपवर्तिनि गयाकुण्डेऽनुष्ठितम्।

### महाभारते उल्लेखः

महाभारते महाराजस्य युधिष्ठिरस्य यात्रावृत्तान्तवर्णने महाराजेन युधिष्ठिरेण अरण्यात् गच्छता लघुनद्यः सन्तीर्य पुष्करजले स्नातव्यमिति वर्णितम्। अत एव कथ्यते पाण्डवैः वनवासकाले कानिचिद्दिनान्यत्र पुष्करतीरे व्यतीतानि। तस्मादेवात्र पञ्चकुण्डः विनिर्मितः। सुभद्राहरणानन्तरम् अर्जुनः पुष्करे व्यश्राम्यत्। अगस्त्य-वामदेव-जमदग्नि-आदीनाम् ऋषीणां तपस्यास्थलरूपेण विद्यमानाः गुहाः अधुनापि 'नागपहाड़' इत्यत्र सन्ति। महाभारतस्य वनपर्वानुसारेण श्रीकृष्णेन पुष्करे दीर्घकालं तपस्या कृता।

### ब्रह्मामन्दिरम्

पुष्करः तीर्थानां मुखम्। पुष्करे मुख्यमन्दिरं ब्रह्मामन्दिरम्। मन्दिरे चतुर्मुखस्य ब्रह्मदेवस्य प्रतिमा विलसति। मन्दिरस्य दक्षिणे सावित्री एवं वामे तू गायत्रीमन्दिरम् वर्तते। ब्रह्मवैवर्तपुराणे उल्लिखितं यत् मानसपुत्रेण नारदेन सृष्टिकर्म कर्तुं प्रत्यादेशितम्। अत एव ब्रह्मा नारदं रोषात् शशाप यत् नारदः नष्टज्ञानो भूत्वा गन्धर्वयोनिं प्राप्य कामिनीभिः वशीभूतोऽभविष्यत्। तदा दुःखी नारदोऽपि पितरं ब्रह्माणम् शशाप यत् कल्पत्रयं यावल्लोके कोऽपि भगवन्तं ब्रह्माणं न पूजयिष्यति तथा च भवन्मन्त्रश्लोककवचादीन् विलोप्स्यति। ततो ब्रह्मा न पूज्यते। अपि तु पुष्करक्षेत्रे एव प्रतिवर्षमेकवारं ब्रह्मणः पूजा-अर्चना सम्पद्यते।

भारतवर्षे केवलमेकमेवात्र पुष्करे ब्रह्मामन्दिरं विद्यते। चतुर्मुखी ब्रह्मा देवी गायत्री तथा सावित्री अत्र मूर्तिस्वरूपाः विद्यमानाः। ननु पुष्करः एकं पवित्रं तीर्थम्।

---

## 'सुधर्मा' दैनिकस्य समुद्घोषणा।

०९.०५.१७ - मैसूरू इत्यत्र प्रकाश्यमान-सुधर्मा-दैनिकस्य समुद्घोषणा - १) संस्कृतक्षेत्रे गणनीयसेवां कृतवतां सम्माननम्। २) कलाक्षेत्रे अतितमां सेवां कृतवतीनां महिलानां सम्माननम् ३) लोकेभ्यः संस्कृतग्रन्थार्पणम् ४) सुधर्मार्थं लेखनादिसाहित्यप्रेषकाणां विद्वज्जनानां सम्मानः। ५) संस्कृतवार्तावाचकानां सम्मानः। सुधर्मा इति पत्रिकायाः अष्टचत्वारिंशत्तमे वर्धापनदिवसे उपर्युक्तजनानां सत्कार-सम्मानः ग्रन्थार्पणं च भविष्यति।